This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥र्द०॥ ॐ अथ कठवल्ली स्योनमः॥ ॥ॐ उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ
तस्य ह नचिकेता नाम पुत्र आस॥ तं ह कुमारं संतं दक्षिणासु नीयमानासु श्रद्धा
सा मन्य श्रेविवेश॥ पीतोदका जग्धतृणा दुग्धदोहा निरिंद्रियाः॥ अनंदा नाम ते लोका
ते स्तान्स गच्छति ता ददत्॥ स होवाच पितरं तात कस्मै मां दास्यसि कस्मै मां दास्य
सीति द्वितीयं तृतीयं तं होवाच मृत्यवे त्वा ददामीति॥ बहूनामेमि प्रथमो ब
हूनामेमि मध्यमः किंस्विद्यमस्य कर्तव्यं यन्मयाद्य करिष्यतीति॥ अनुपश्यय ॥१॥
था पूर्वे प्रतिपश्य तथापरे॥ सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः॥ वैश्वा

स्वा स्थमुक्तं। स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति॥ उभे तीर्त्वा
अशनायापिपासे शोकातिगो मोदते स्वर्गलोके। स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रू
हि तं श्रद्दधानाय मह्यं। स्वर्गलोका अमृतत्वं भजंत एतद्द्वितीयेन वृणे वरेण॥ प्र
ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्॥ अनंतलोकाप्तिमथो प्र
तिष्ठां विद्धि त्वमेतं निहितं गुहायां॥ लोकादिमग्निं तमुवाच तस्मै या इष्टका यावती
र्वा यथा वा स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनराह तुष्टः॥ तमब्रवीत्प्री
यमाणो महात्मा वरं तवेहाद्य ददामि भूयः। तवैव नाम्ना भविता यमग्निः सृकां २

Checked 2012

M 1133
Acc. No! - ~~1279.~~
Title! - कठ उपनिषद.
Subject! - उपनिषद.
पेज: 17

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्॥ तस्यै२तां शांतिं कुर्वंति हर वैवस्वतो
दकं। आशाः प्रतीक्षे संगतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्॥ एतद्वृंक्ते पुरुष
स्याल्पमेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे। तिस्रो रात्रीर्यदवात्सीर्गृहे मे
ऽनश्नन्ब्रह्मन्नतिथिर्नमस्यः। नमस्तेस्तु ब्रह्मन्स्वस्ति मेस्तु तस्मात्प्रति त्रीन्वरा
न्वृणीष्व॥ शांतसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभिमृत्यो॥ त्वत्प्रसृ
ष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥ यथा पुरस्ताद्भविता प्रतीत औद्दा
लकिरारुणिर्मत्प्रसृष्टः॥ सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमु

चेमामनेकरूपां गृहाण॥ त्रिणाचिकेतस्त्रिभिरेत्य संधिं त्रिकर्मकृत्तरति जन्म
मृत्यू॥ ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शांतिमत्यंतमेति॥ त्रिणाचि
केतस्त्रयमेतद्विदित्वा य एवं विद्वांश्चिनुते नाचिकेतं॥ स मृत्युपाशान्पुरतः
प्रणोद्य शोकातिगो मोदते स्वर्गलोके॥ एष तेग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा
व द्वितीयेन वरेण एतमग्निं तवैव प्रवक्ष्यंति जनासस्तृतीयं वरं नचिकेतो वृणीष्व
ये यं प्रेते विचिकित्सा मनुष्येस्तीत्येके नायमस्तीति चैके॥ एतद्विद्यामनुशिष्ट
स्त्वयाहं वराणामेष वरस्तृतीयः॥ देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमएरेषधर्मः॥अन्यंवरंनचिकेतोवृणीष्वमामोपरोत्सीरतिमासृजैनं॥दे
वैरत्रापिविचिकित्सितंकिलत्वंचमृत्योयन्नसुविज्ञेयमात्थवक्ताचास्यत्वादृ
गन्योनलभ्योनान्योवरस्तुल्यएतस्यकश्चित॥शतायुषःपुत्रपौत्रान्वृणीष्व
बहून्पशून्हस्तिहिरण्यमश्वान्॥भूमेर्महदायतनंवृणीष्वस्वयंचजीवशरदो
यावदिच्छसि॥एतत्तुल्यंयदिमन्यसेवरंवृणीष्ववित्तंचिरंजीविकांच।महाभूमौ
नचिकेतस्त्वमेधि।कामानांत्वाकामभाजंकरोमि।येयेकामादुर्लभामर्त्य
लोकेसर्वान्कामांछंदतःप्रार्थयस्व॥इमारामाःसरथाःसतूर्यानहीदृशालंभनी ३

यामनुष्यैः॥आभिर्मत्प्रत्ताभिःपरिचारयस्वनचिकेतोमरणंमानुप्राक्षीः॥श्वोभा
वामर्त्यस्ययदंतकैतत्सर्वेंद्रियाणांजरयंतितेजः॥अपिसर्वंजीवितमल्पमेवत
वैववाहास्तवनृत्यगीते॥नवित्तेनतर्पणीयोमनुष्योलप्स्यामहेवित्तमद्राक्ष्मचेत्त्वां
जीविष्यामोयावदीशिष्यसित्वंवरस्तुमेवरणीयःसएव॥अजीर्यताममृतानां
मुपेत्यजीर्यन्मर्त्यः॥क्वधःस्थःप्रजानन्।अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे
जीवितेकोरमेत॥यस्मिन्निदंविचिकित्संतिमृत्योयत्सांपरायेमहतिब्रूहिनस्त
त्॥योयंवरोगूढमनुप्रविष्टोनान्यंतस्मान्नचिकेतावृणीते॥१॥प्रथमावल्ली॥

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।। ।।अन्यच्छ्रेयो न्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः तयाश्रेय
आ दानस्य साधु भवति हीयते ऽर्थाद्य उ प्रेयो वृणीते। श्रेयश्च प्रेयश्च मनुष्यमे
तस्तौ संपरीत्य विविनक्ति धीरः। श्रेयो हि धीरो ऽभि प्रेयसो वृणीते प्रेयो मंदो
योगक्षेमाद्वृणीते सत्वं प्रियान्प्रियरूपांश्च कामानभिध्यायन्नचिकेतो ऽत्यस्रा
क्षीः।। नैतां सृंकां वित्तमयीमवाप्तो यस्यां मज्जंति बहवो मनुष्याः। दूरमेते वि
परीते विषूची अविद्या या च विद्येति ज्ञाता। विद्याभीप्सितं नचिकेतसं मन्ये न त्वा
कामा बहवो लोलुपंत।। अविद्यायामंतरे वेष्टमानाः स्वयं धीराः पंडितंम ४

न्यमानाः।। दंद्रम्यमाणाः परियंति मूढा अंधेनैव नीयमाना यथांधाः। न सांपरा
यः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं।। अयं लोको नास्ति पर इति मानी
पुनः पुनर्वशमापद्यते मे।। श्रवणायापि बहुभिर्यो न लभ्यः। शृण्वंतोर्बहवो पि
यं न विद्युः।। द्युः।। आश्चर्यो वक्ता कुशलो ऽस्य लब्धा ऽऽश्चर्यो ज्ञाता कुशला
नुशिष्टः न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिंत्यमानः। अनन्यप्रोक्ते
गतिरत्र नास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात् नैषा तर्केण मतिरापनेया
प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ। यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृया न्नचिकेतः ऽत्रष्टा। जानाम्यहं शेवधिरन्यनित्यं न ह्यध्रुवैः॥ प्राप्यते हि
ध्रुवं तत ततो माया नाचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यं
कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनंत्यमभयस्य पारं। स्तोमं महदुरुगा
यं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः। तं दुर्दर्शं गूढमनुप्रवि
ष्टं गुहाहितं गह्वरेष्टं पुराणं। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्ष
शोकौ जहाति॥ एतच्छ्रुत्वा संपरिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य
समोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये। अन्यत्र धर्माद ५

न्यत्राधर्मादन्यत्रास्मात्कृताकृतात्॥ अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि त
द्वद सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति यदिच्छंतो ब्रह्मचर्यं
चरंति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्॥ एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्ष
रं परं एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्। एतदालंबनं श्रेष्ठमेतदा
लंबनं परं एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते। न जायते म्रियते वा वि
पश्चिन्नायं कुतश्चिन्नबभूव कश्चित्॥ अजो नित्यः शाश्वतोयं पुराणो
न हन्यते हन्यमाने शरीरे। हंता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं॥ उभौ तौ

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नविजानीतोनायंहंतिनहन्यते॥अणोरणीयान्महतोमहीयानात्मास्यजं
तोर्निहितोगुहायां।तमक्रतुःपश्यतिवीतशोकोधातुप्रसादान्महिमा
नमात्मनः।आसीनोदूरंव्रजातिशयानोयातिसर्वतः।कस्तंमदामदंदेवं
मदन्योज्ञातुमर्हति॥अशरीरंशरीरेष्वनवस्थेष्ववस्थितं।महांतंविभुमा
त्मानंमत्वाधीरोनशोचति॥नायमात्माप्रवचनेनलभ्योनमेधयानबहुना
श्रुतेन।यमेवैषवृणतेतेनलभ्यस्तस्यैषआत्माविवृणतेतनूंस्वां।नाविर
तोदुश्चरितान्नाशांतोनासमाहितः।नाशांतमनसोवापिप्रज्ञानेनैनमाप्नु ६

यात्॥यस्यब्रह्मचक्षत्रंचोभेभवतओदनः॥मृत्युर्यस्योपसेचनंकइत्था
वेदयत्रसः॥२॥ इतिद्वितीयावल्ली॥ ॥२॥ ॥ऋतंपिबंतौसुकृ
तस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धे॥छायातपौब्रह्मविदोवदंतिपंचाग्न
योयेचत्रिनाचिकेतः।यःसेतुरीजानानामक्षरंब्रह्मयत्परं॥अभयंतितीर्ष
तांपारंनाचिकेतंशकेमहि॥आत्मानंरथिनंविद्धिशरीरंरथमेवतु॥बुद्धिं
तुसारथिंविद्धिमनःप्रग्रहमेवच॥इंद्रियाणिहयानाहुर्विषयांस्तेषुगो
चरान्॥आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः।यस्त्वविज्ञानवान्भव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्ययुक्तेनमनसासदा॥तस्येंद्रियाण्यवश्यानिदुष्टाश्वाइवसारथेःय
स्तुविज्ञानवान्भवतियुक्तेनमनसासदा।तस्येंद्रियाण्यवश्यानिदुष्टा सदश्
श्वाइवसारथेः।यस्त्वविज्ञानवान्भवत्यमनस्कःसदाशुचिः।नसतत्प
दमाप्नोतिसंसारंचाधिगच्छति॥यस्तुविज्ञानवान्भवतिसमनस्कःस
दाशुचिः।सतुतत्पदमाप्नोतियस्माद्भूयोनजायते॥विज्ञानसारथि
र्यस्तुमनःप्रग्रहवान्नरः।सोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदं॥इंद्रि
येभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः॥मनसस्तुपराबुद्धिर्बुद्धेरात्मामहा ७

न्परः।महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः।पुरुषान्नपरंकिंचित्साका
ष्ठासापरागतिः॥एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते॥दृश्यतेत्वग्र्य
यावुध्यासूक्ष्मयासूक्ष्मदर्शिभिः।यच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआ ज्ञ
त्मनि।ज्ञानमात्मनिमहतियच्छेत्तद्यच्छेच्छांतआत्मनि।उत्तिष्ठतजाग्रत
प्राप्यवरान्निबोधत।क्षुरस्यधारानिशितादुरत्यया।दुर्गंपथस्तत्कवयो
वदंति।अशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयत्॥
अनाद्यनंतंमहतःपरंध्रुवंनिचाय्यतंमृत्युमुखात्प्रमुच्यते॥यइमंप

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनं॥ उक्त्वा श्रुत्वा च मेधावी ब्रह्म
लोके महीयते॥ य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि॥ प्रयतः श्राद्धकाले
वा तदनंत्याय कल्पते॥ तदनंत्याय कल्पत इति॥ ३॥ ॥तृतीयाव
ल्ली॥ ॥३॥ इत्यथर्ववेदोपनिषत्सु कठवल्ल्याख्यायां पूर्ववल्ली स
माप्ता॥ पंचविंशत्॥ २५॥ ॥उत्तरवल्ली लिख्यते॥ परांचि
खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नांतरात्मन्॥ कश्चिद्धीरः
प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥ पराचः कामाननुयंति ८

बालास्ते मृत्योर्यंति विततस्य पाशं॥ अथ धीरा अमृतत्वं विदित्वा ध्रुवम
ध्रुवेष्विह न प्रार्थयंति। येन रूपं रसं गंधं शब्दान्स्पर्शांश्च मैथुनान्॥ एतेनैव
विजानाति किमत्र परिशिष्यते एतद्वै तत्॥ स्वप्नांतं जागरितांतं चोभौ येनानु
पश्यति। महांतं विभुमात्मानं मत्वा धीरो न शोचति। य इमं मध्वदं वेद आत्मानं
जीवमंतिकात्। ईशानं भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत्॥ यः पू
र्वं तपसो जातमद्भ्यः पूर्वमजायत। गुहां प्रविश्य तिष्ठंतं यो भूतेभिर्व्यपश्य
त एतद्वै तत्। या प्राणेन संभवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीयोऽभूते निर्व्यजायत एतद्वै तत्॥ अरण्योर्निहितो जातवेदा गर्भ इव
सुभृतो गर्भिणीभिः। दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्नि
रेतद्वै तत्॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति। तं देवाः सर्वे अर्पितास्तदु
नात्येति कश्चन एतद्वै तत्॥ यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः समृ
त्युं गच्छति य इह नानेव पश्यति। मनसैवेदमाप्तव्यं नेह नानास्ति किंचन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति॥ अंगुष्ठमात्रः पुरुषो मध्य
आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सत एतद्वै तत्॥ ८

अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः॥ ईशानो भूतभव्यस्य स एवाद्य
स उ श्व एतद्वै तत्॥ अंगुष्ठमात्रः। यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति॥ ए
वं धर्मान्पृथक्पश्यंस्तानेवानुधावति॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव
भवति॥ एवं मुनेर्विजानत आत्मा भवति गौतम॥४॥ ॥चतुर्थवल्ली॥४॥
॥पुरमेकादशद्वारमजस्यावक्रचेतसः॥ अनुष्ठाय न शोचति विमुक्तश्च विमु
च्यत एतद्वै तत्॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ ऊर्ध्वं प्राण

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुन्नयत्यपानंप्रतिगस्यति।मध्येवामनमासीनंविश्वदेवाउपासते॥अस्य
विस्रंसमानस्यशरीरस्थस्यदेहिनः॥देहाद्विमुच्यमानस्यकिमत्रपरिशिष्यत
एतद्वैतत्॥नप्राणेननापानेनमर्त्योजीवतिकश्चन॥इतरेणतुजीवंतियस्मि
न्नेतावुपाश्रितौ॥हंततइदंप्रवक्ष्यामिगुह्यंब्रह्मसनातनं।यथाचमरणंप्राप्य
आत्माभवतिगौतम।योनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः॥स्थाणुमन्येनु
संयंतियथाकर्मयथाश्रुतं॥यएषसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्मि
माणः।तदेवशुक्रंतद्ब्रह्मतदेवामृतमुच्यते॥तस्मिंल्लोकाःश्रिताःसर्वेतदुनात्ये १०

तिकश्चनएतद्वैतत्॥अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव
एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरूपोबहिश्च।वायुर्यथैकोभुवनंप्र
विष्टोरूपंरूपंप्रतिरूपोबभूव।एकस्तथासर्वभूतांतरात्मारूपंरूपंप्रतिरू
पोबहिश्च।सूर्योयथासर्वलोकस्यचक्षुर्नलिप्यतेचाक्षुषैर्बाह्यदोषैः।ए
कस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यः।एकोवशीसर्वभू
तांतरात्माएकंरूपंबहुधायःकरोति।तमात्मस्थंयेनुपश्यंतिधीरास्ते
षांसुखंशाश्वतंनेतरेषां॥नित्योनित्यानांचेतनश्चेतनानामेकोबहू

10

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां यो विदधाति कामान्। तमात्मानं ये नुपश्यंति धीरास्तेषां सुखं शा-
श्वतं नेतरेषां नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधा
ति कामान्॥ तमात्मानं ये नपश्यंति धीरास्तेषां शांतिः शाश्वती नातरे
षां॥ तदेतदिति मन्यंते निर्देश्यं परमं सुखं॥ कथं नु तद्विजानीयां किमु
भांतु मनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥ ॥इति पंचमव
ल्ली॥ ५॥ ॥ऊर्ध्वमूलो अवाक्शाख एषोश्वत्थः सनातनः तदे
व शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्ये १२

ति कश्चन एतद्वै तत्॥ यदिदं किंच जगत्सर्वं प्राण एजति निसृतं। महद्भयं वज्रमु
द्यतं। य एतद्विदुरमृतास्ते भवंति। भयादस्याग्निस्तपति भयात्तपति सूर्यः। भया
दिंद्रश्च वायुश्च मृत्युर्धावति पंचमः। इह चेदशकद्बोद्धुं प्राक्शरीरस्य विस्र
तः॥ ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते। यथादर्शे तथात्मनि यथा स्वप्ने
तथा पितृलोके। यथाप्सु परीव ददृशे तथा। गंधर्वलोके छायातपयोरिव ब्र
ह्मलोके। इंद्रियाणां पृथग्भावमुदयास्तमयौ च यत्। पृथगुत्पद्यमानानां मत्वा
धीरो न शोचति॥ इंद्रियेभ्यः परं मनो मनसः सत्वमुत्तमं॥ सत्वादधि महानात्माम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतो व्यक्तमुत्तमं ॥ अव्यक्तात्परः पुरुषो व्यापकोऽलिंग एव च ॥ यज्ज्ञात्वा मुच्य
ते जंतुरमृतत्वं च गच्छति ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्च
नैनं । हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति ॥ यदा पंचावति
ष्ठंते ज्ञानानि मनसा सह ॥ बुद्धिश्च न विचेष्टति तमाहुः परमां गतिं ॥ तां योग
मिति मन्यंते स्थिरामिंद्रियधारणां ॥ अप्रमत्तस्तदा भवति योगो हि प्रभवा
प्ययौ ॥ नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा ॥ अस्तीति ब्रुवतोऽन्यत्र १२
कथं तदुपलभ्यते । अस्तीत्येवोपलब्धव्यस्तत्वभावेन चोभयोः । अस्ती

त्येवोपलब्धस्य तत्वभावः प्रसीदति । यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि
स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति यदा सर्वे प्रभिद्यं
ते हृदयस्येह ग्रंथयः । अथ मर्त्योऽमृतो भवत्येतावदनुशासनं । शतं चैका
च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्व
मेति विष्वङ्ङन्या उत्क्रमणे भवंति ॥ अंगुष्ठमात्रः पुरुषोंऽतरात्मा सदा
जनानां हृदये संनिविष्टः । तं स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्ये
ण तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति ॥ मृत्युप्रोक्तां नाचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केतोप्यलब्ध्वा विद्यामेतां योगविधिंचकृत्स्नं। ब्रह्मप्राप्तोविरजोभूद्विमृ
तुरन्योप्येवं योविदध्यात्ममेव॥ सहनाववतु सहनौभुनक्तु सहवीर्यंकर
वावहै॥ तेजस्विनावधीतमस्तु माविद्विषावहै शांतिः शांतिः शांतिः
शांतिः॥ षष्ठवल्ली॥६॥ ॥इत्यथर्ववेदोपनिषत्सु कठवल्ल्याख्या
यामुक्तरवल्लीसमाप्ता॥ षट्त्रिंशत्॥३६॥ ॥क्षुधाप्याद्यंतवैरसं
विषयेषु स्फुर्प्रीतिं॥ बध्नातिनावनींन्र्योनरोनासोसगर्द्भः॥ केनेषि
तंपततिप्रेषितंमनः केनप्राणः प्रथमः प्रैतियुक्तः। केनेषितांवाचमिमां १२

वदंतिचक्षुः श्रोत्रंकउदेवोयुनक्ति। श्रोत्रस्यश्रोत्रंमनसोमनोयद्वाचो
हवाचं। सउप्राणस्यप्राणंचक्षुषश्चक्षु रतिमुच्यधीराः। प्रेत्यास्माल्लो
कादमृताभवंतिनतत्रचक्षुर्गच्छति। नवाग्गच्छतिनोमनोनविद्मोनविजा
नीमोयथैतदनुशिष्यात्॥ अन्यदेवतद्विदितादथोअविदितादधिइ
तिशुश्रुमपूर्वेषां येनस्तद्व्याचचक्षिरे। यद्वाचानभ्युदितंयेनवागभ्यु
द्यते॥ तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते। यन्मनसानमनुतेये
नाहुर्मनोमतं। तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते॥ यच्चक्षुषानप

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्पतियेनचक्षूंषिपश्यति।तदेवब्रह्मत्वंविद्धिनेदंयादिदमुपासते।यछ्रो
त्रेणनशृणोतियेनश्रोत्रमिदंश्रुतं॥तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपा
सते।यत्प्राणेनन प्राणितियेनप्राणःप्रणीयते।तदेवब्रह्मत्वंविद्धि
नेदंयादिदमुपासते॥१॥प्रथमःखंडः१॥ ॥यादिमन्यसेसुवेदेति
दह्रमेवापिनूनं॥त्वंवेत्थब्रह्मणोरूपंयदस्यत्वंयादिस्यच।देवेष्वथ
नुमीमांस्यमेवैतिमन्येविदितं।नाहंमन्येसुवेदेतिनोनवेदेतिवेदच॥
योनस्तद्वेदतद्वेदनोनवेदेतिवेदच॥यस्यामतंतस्यमतंमतंयस्यनवे ॥१४॥

दसः।अविज्ञातंविजानतांविज्ञातमविजानतां।प्रतिबोधविदितंमतम
मृतत्वंहिविंदते॥आत्मनाविंदतेवीर्यंविद्ययाविंदतेमृतं॥इहचेदवे
त दीदथसत्यमस्तिनचेदिहावेदीन्महतीविनष्टिः।भूतेषुभूतेषुविचिं
त्यधीराःप्रेत्यास्माल्लोकादमृताभवंति॥२॥द्वितीयखंडः॥२॥ ॥
॥ब्रह्महदेवेभ्योविजिग्येजतेतस्यहब्रह्मणोविजयेदेवाअमहीयंततएक्षं
तअस्माकमेवायंविजयोऽस्माकमेवायंमहिमेतितद्धैषांविजज्ञौतेभ्यो
हप्रादुर्बभूवतन्नव्यजानतकिमिदंयक्षमितितेऽग्निमब्रुवंजातवेदएतद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जानीहि किमिति तथेति तदभ्यद्रवत्तमभ्यवदत्कोसीत्यग्निर्वाहमस्मी
त्यब्रवीज्जातवेदा अहमस्मीति तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वं
दहेयं यदिदं पृथिव्यामिति तस्मै तृणं निदधावेतद्दहेति तदुपप्रेया
य सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञा
तुं यदेतद्यक्षमित्यथ वायुमब्रुवन्वायवेतद्विजानीहि किमिदं यक्षमि
त्यथ वायुमब्रुवन्वायवेतद्विजानीहि किमिदं यक्षमिति तथेति तद
भ्यद्रवत्तमभ्यवदत्कोसीति वायुर्वाहमस्मीत्यब्रवीन्मातरिश्वा वाहम १५
स्मीति तस्मिंस्त्वयि किं वीर्यमित्यपीदं सर्वमाददीय यदिदं पृथिव्यामिति

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाका
दातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमित्यथेन्द्रम
ब्रुवन्मघवन्नेतद्विजानीहि किमिदं यक्षमिति तथेति तदभ्यद्रवत्तस्मा
त्तिरोदधे स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैम
वतीं तां होवाचा किमिदं यक्षमिति सा ब्रह्मेति होवाच ब्रह्मणो ह वावि
जये महीयध्वमिति ॥ ततो हैव विदांचकार ब्रह्मेति तस्माद्वा एते देवा
अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्ने[illegible]दिष्ठं पस्प
र्शुस्ते ह्येनत्प्रथमं विदांचकार ब्रह्मेति तस्मैषो औदें स्माद्वा इंद्रो अतित

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामिवान्यान्देवान्सह्येनन्नेदिष्ठंपस्पर्शसह्येनस्प्रथमंविदांचकारब्रह्मेति
तस्यैषआदेशोयदेतद्विद्युतोविद्युतदाइतीन्यमीमिषदाउइत्यधि
दैवतमथाध्यात्मंयदेतद्गछतीवचमनोनेनचैतदुपस्मरत्यभीक्ष्णं
संकल्पःतद्धतद्वनंनामतद्वनमित्युपासितव्यंयएतदेवंवेदाभिह्येनं
सर्वाणिभूतानिसंवांछंत्युपनिषदंभोब्रूहीत्युक्तातउपनिषद्ब्राह्मी
वचंतउपनिषदमब्रूमेतितस्यैतपोदमःकर्मेतिप्रतिष्ठावेदाःसर्वा
गानिसत्यमायतनंयोवाएतामुपनिषदंवेदापहत्यपाप्मानमनंतेस्व ८६
गलोकेप्रतिष्ठ

ति
र्गेलोकेज्येयेप्रतिष्ठतिप्रतितिष्ठतीति॥४॥चतुर्थःखंडः॥४॥ ॥इत्य
थर्ववेदेकेनेषितोपनिषत्समाप्त॥ ॥सप्तत्रिंशत्॥३७॥ ॥अथपु
न रुषोहवैनारायणोकामयत्प्रजाःसृजेयेतिनारायणात्प्राणोजायतेमनः
सर्वेंद्रियाणिच।खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणी।नारायणा
द्ब्रह्माजायतेनारायणादिंद्रोजायतेनारायणाद्वादशादित्यारुद्राःसर्वादे
वताःसर्वाणिचभूतानिनारायणादेवसमुत्पद्यंतेनारायणेप्रलीयंते
नारायणेप्रलीयंते।१॥अथनित्योदेवएकोनारायणोब्रह्माचनारायणः
श्चनारायणःशक्रश्चनारायणोद्वादशादित्याश्चनारायणोधश्च

(16)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यणऊर्द्धंचनारायणोंतर्बहिश्चनारायणोनारायएवेदंसर्वंयद्भूतंयच्च
व्यमथनिष्कलोनिराख्यातोनिर्विकल्पोनिरंजनःशुद्धोद्वितीयोनद्वितीयो
स्तिकश्चिद्यएवंवेद।रुद्रंससारथिंकृत्वामनःप्रग्रहवान्नुमान्।त्रयातिप
रमंपारंविष्णोराख्यंपदमव्ययं।एतद्वैनारायणस्योपनिषदंयोहवैनाराय
णस्योपनिषदमधीतेससर्वेभ्योअघेभ्योविमुक्तोभवतिसर्वांश्चलोकाना
प्नोत्यमृतत्वंचगत्वामृतत्वंचगच्छतोमित्येतदग्रेव्याहरेन्नमइतिद्वितीय
मोमित्येकाक्षरंनमइतिद्वेअक्षरेनारायणायेतिपंचाक्षराणिएतद्वैनाराय
णस्याष्टाक्षरंपदंयोहवैनारायणस्याष्टाक्षरंपदमध्येत्यनुष्टुब्रुवन्सर्वमा

K K S U LIBRARY
RAMTEK
441 106
M1133
Dist Nagpur

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 16:21
,TRANSFERRED=2020/10/23 at 16:24:29
,PAGES=17
,TYPE=STD
,NAME=S0004506
,Book Name=M-1133-KATH UPNISHAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection